श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्रीशङ्कराचार्य विरचितम्

# ॥ श्रीराघवाष्टकम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीराघवाष्टकम् ॥

राघवं करुणाकरं मुनिसेवितं सुरवन्दितं
जानकीवदनारविन्ददिवाकरं गुणभाजनम्।
वालिसूनुहितैषिणं हनुमत्प्रियं कमलेक्षणं
यातुधानभयङ्करं प्रणमामि राघवकुञ्जरम् ॥ 1 ॥

मैथिलीकुचभूषणामल नीलमौक्तिकमीश्वरं
रावणानुजपालनं रघुपुङ्गवं मम दैवतम्।
नागरीवनिताननाम्बुजबोधनीयदिवाकरं
सूर्यवंशविवर्धनं प्रणमामि राघवकुञ्जरम् ॥ 2 ॥

हेमकुण्डलमण्डितामलकण्ठदेशमरिन्दमं
शातकुम्भ मयूरनेत्रविभूषणेन विभूषितम्।
चारुनूपुरहारकौस्तुभकर्णभूषणभूषितं
भानुवंशविवर्धनं प्रणमामि राघवकुञ्जरम् ॥ 3 ॥

दण्डकाख्यवने रतामरसिद्धयोगिगणाश्रयं
शिष्टपालनतत्परं धृतिशालिपार्थकृतस्तुतिम्।
कुम्भकर्णभुजाभुजङ्गविकर्तने सुविशारदं
लक्ष्मणानुजवत्सलं प्रणमामि राघवकुञ्जरम् ॥ 4 ॥

केतकीकरवीरजातिसुगन्धिमाल्यसुशोभितं
श्रीधरं मिथिलात्मजाकुचकुङ्कुमारुणवक्षसम्।
देवदेवमशेषभूतमनोहरं जगतां पतिं
दासभूतभयापहं प्रणमामि राघवकुञ्जरम् ॥ 5 ॥

यागदानसमाधिहोमजपादिकर्मकरैर्द्विजैः
    वेदपारगतैरहर्निशमादरेण सुपूजितम्।
ताटकावधहेतुमङ्गदतातवालिनिषूदनं
    पैतृकोदितपालकं प्रणमामि राघवकुञ्जरम्॥ **6** ॥

लीलया खरदूषणादिनिशाचराशुविनाशनं
    रावणान्तकमच्युतं हरियूथकोटिगणाश्रयम्।
नीरजाननमम्बुजाङ्घ्रियुगं हरिं भुवनाश्रयं
    देवकार्यविचक्षणं प्रणमामि राघवकुञ्जरम्॥ **7** ॥

कौशिकेन सुशिक्षितास्त्रकलापमायतलोचनं
    चारुहासमनाथबन्धुमशेषलोकनिवासिनम्।
वासवादिसुरारिरावणशासनं च पराङ्गतिं
    नीलमेघनिभाकृतिं प्रणमामि राघवकुञ्जरम्॥ **8** ॥

राघवाष्टकमिष्टसिद्धिदमच्युताश्रयसाधकं
    मुक्तिभुक्तिफलप्रदं धनधान्यसिद्धि विवर्धनम्।
रामचन्द्रकृपाकटाक्षदमादरेण सदा जपेत्
    रामचन्द्रपदाम्बुजद्वय सन्ततार्पितमानसः॥ **9** ॥

राम राम नमोऽस्तु ते जय रामभद्र नमोऽस्तु ते
    रामचन्द्र नमोऽस्तु ते जय राघवाय नमोऽस्तु ते।
देवदेव नमोऽस्तु ते जय देवराज नमोऽस्तु ते
    वासुदेव नमोऽस्तु ते जय वीरराज नमोऽस्तु ते॥ **10** ॥

॥ इति श्रीराघवाष्टकं समाप्तम्॥